**MP BOARD CLASS 10 SANSKRIT GENERAL MODEL PAPER SET 2 2020**

म.प्र. बोर्ड कक्षा 10 संस्कृत (सामान्य) मोडल पेपर सेट 2 2020

समयः : घण्टात्रयम्] [पूर्णाङ्काः : १००

निर्देशाः-(i) सर्वे प्रश्नाः अनिवार्याः सन्ति।

(ii) प्रश्नाना सम्मुखे अङ्काः प्रदत्ताः।

'प्रश्न १. उचितविकल्पं चित्वा लिखत- १×५ =५

(क) 'तल्लीनः' इत्यस्मिन् पदे सन्धिः अस्ति-

(अ) व्यञ्जनसन्धिः (ब) वृद्धिसन्धिः (स) विसर्गसन्धिः (द) पूर्वरूपसन्धिः ।

(ख) 'जगदीशः' इत्यस्य पदस्य सन्धि-विच्छेदः अस्ति-

(अ) जगत् + ईशः (ब) जग दीशः (स) जगत+इशः (द) जग + ईशः।

(ग) 'उत्+चारणम्' इत्यस्य पदस्य सन्धिः अस्ति

(अ) उत्चारणम् (ब) उचारणम् (स) उच्चारणम् (द) उच्छारणम्।

(घ) विसर्गसन्धेः उदाहरणम् अस्ति-

(अ) षडाननः (ब) तच्छीलः (स) प्रत्येकः (द) मनोरथः।

(ङ) अधोलिखितेषु अव्ययम् नास्ति।

(अ) यदा (ब) कदा (स) पता (द) तदा।

उत्तर-(क) (अ), (ख) (अ), (ग) (स), (घ) (द), (ङ) (स)।

प्रश्न २. उचितविकल्पं चित्वा लिखत- १×५=५

(क) 'चौरभयम्' इत्यस्मिन् पदे समासः भवति-

(अ) पञ्चमीतत्पुरुषः (ब) अव्ययीभावः (स) द्विगुः (द) कर्मधारयः।

(ख) 'द्वन्द्वसमासस्य' उदाहरणम अस्ति-

(अ) बाणहतः (ब) पञ्चपात्रम् (स) कृष्णभक्तः (द) पितरौ।

(ग) 'परोपकारः' इत्यस्य पदस्य समासः अस्ति-

(अ) परोषाम् उपकारः (ब) परेशाम् अपकारः (स) परस्कारः उपकारः (द) परेषाम् उपकारः।

(घ) 'प्राचार्यः' इत्यस्मिन् पदे उपसर्गः अस्ति-

(अ) प्र (ब) प्रा (स) प (द) प्री।

(ङ) अधोलिखितेषु उपसर्गः अस्ति-

(अ) उप (ब) यत्र (स) अत्र (द) यदा।

उत्तर-(क) (अ), (ख) (द), (ग) (द), (घ) (अ), (ङ) (अ)।

प्रश्न ३. उचितविकल्पं चित्वा लिखत-

(क) 'अपठम्' इत्यस्मिन् पदे लकारः अस्ति-

(अ) लोट्लकारः (ब) लङ्लकारः (स) लट्लकारः (द) विधिलिङ्लकारः।

(ख) 'वर्तते' इत्यस्मिन् पदे धातुः अस्ति-

(अ) वर्त (ब) वच् (स) वृत् (द) वद्।

(ग) 'पक्ष्यसि' इत्यस्मिन् पदे पुरुषः अस्ति-

(अ) प्रथमपुरुषः (ब) मध्यमपुरुषः (स) उत्तमपुरुषः (द) अधमपुरुषः।

(घ) 'हसामि' इत्यस्मिन् पदे वचनम् अस्ति-

(अ) एकवचनम् (ब) द्विवचनम् (स) बहुवचनम् (द) त्रिवचनम्।

(ङ) 'सदाचारः एव परमोधर्मः' इत्यस्मिन् वाक्ये अव्ययम् अस्ति-

(अ) सदाचारः (ब) एव (स) परमः (द) धर्मः।

उत्तर-(क) (ब),(ख) (स), (ग) (ब),(घ) (अ), (ङ) (ब)।

प्रश्न ४. उचितविकल्पं चित्वा लिखत- 1×5=5

(क) 'शतृ' प्रत्ययस्य उदाहरणम् अस्ति-

(अ) चलन् (ब) भ्रमितः (स) पीत्वा (द) पठितवान्।

(ख) 'इतिहास + ठक' इत्यस्य पदम भविष्यति-

(अ) एतिहासिकाः (ब) ऐतिहासिकः (स) ईतिहासिकः (द) इतिहासिकः।

(ग) 'जेतुम्' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) शानच् (ब) तुमुन् (स) क्त्वा (द) शतृ।

(घ) 'बालिका' इत्यस्मिन् पदे प्रत्ययः अस्ति-

(अ) आप् (ब) जाप (स) टाप (द) ज्ञाप्।

(ङ) मितं च सारं च ..............हि वाग्मिता-

(अ) धनो (ब) वचो (स) निर्धनो (द) न।

उत्तर-(क) (अ), (ख) (ब), (ग) (ब),(घ) (स), (ङ) (ब)।

प्रश्न ५. प्रदत्तैः शब्दैः रिक्तस्थानपूर्तिं कुरुत- १×५=५

(पुरातनकालादेव, नीरोगः, मूर्खत्वम्, सहयोगम्, अर्थम्)

(क) मनुष्यः सदा.............भवेत्।

(ख) नगर्याः स्थितिः...........विद्यते।

(ग) सर्वे एव तेषां...............इच्छन्ति।

(घ) रघुः कुबेरात्..............निष्क्रष्टुम् चकमे।

(ङ) पठतो नास्ति ................ ।

उत्तर-(क) नीरोगः, (ख) पुरातनकालादेव, (ग) सहयोगम्, (घ) अर्थम्, (ङ) मूर्खत्वम् ।

प्रश्न ६. अधोलिखितेषु प्रश्नेषु त्रयाणां प्रश्नानाम् उत्तराणि संस्कृतभाषायाम् एकवाक्येन लिखत- ३×२=६

(क) अस्माभिः का वर्धनीया?

(ख) मे मनः किम् अस्तु?

(ग) वर्षाकाले के प्रशान्ताः भवन्ति?

(घ) सुतापेक्षी कः आसीत् ?

(ङ) दयानन्दः केषां प्रचारम् अकरोत् ?

प्रश्न ७. अधोलिखितेषु द्वयोः शब्दयोः शब्दरूपाणि त्रिषु वचनेषु लिखत- 2

(क) रमा-द्वितीया विभक्तिः ।

(ख) कवि-सप्तमी विभक्तिः ।

(ग) युष्मद्-षष्ठी विभक्तिः।

| | | | |
|---|---|---|---|
| उत्तर- | (क) रमाम् | रमे | रमाः। |
| | (ख) कवौ | कव्योः | कविषु। |
| | (ग) तव | युवयोः | युष्माकम्। |

प्रश्न ८.'नामानि' अथवा 'पित्रा' इति पदस्य विभक्तिं वचनं च लिखत। 2

उत्तर-नामानि-प्रथमा/द्वितीया विभक्तिः बहुवचनं च।

पित्रा-तृतीया विभक्तिः एकवचनं च। ।

प्रश्न ९. अधोलिखितेषु गद्यांशेषु गद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-५×२=१०

(अ) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत् । पर्णैः निर्मितं प्राचीनं गृहं तत्। कश्चन् युवक ; तं सादरं स्वागतीकृत्य पानीयभोजनादिभिः तं सत्कृत्य विश्रान्त्यर्थं

व्यवस्थाम् अकरोत्। विश्रान्तेः अनन्तरं सः 'अहं रामदेवस्य पुत्रः' इति स्वपरिचयम् उक्त्वा आगमनकारणम् अपृच्छत् ।

प्रश्न- (i) वासुदेवः कस्य गृहम् अगच्छत् ?

(ii) तत् गृहं कीदृशम् ?

(iii) युवकः स्वपरिचयं किं दत्तवान् ?

(iv) युवकः वासुदेव किम् अपृच्छत् ?

(v) "वासुदेवः" इत्यस्य पदस्य विभक्तिवचनञ्च लिखत ।

(ब) ततोऽसौ देशाद्देशान्तरं विचरन् व्याकरणवेदान्तादीन्यनेकशास्त्राणि वेशषतः योगपद्धतिं च अशिक्षत। विचरणकालेऽयं नर्मदातीरे स्वामिपूर्णानन्दसरस्वतीसकाशात् संन्यासमगृह्णात्। तदा एषः 'दयानन्दसरस्वतीति' नाम्ना प्रसिद्धः जातः। अनन्तरं मथुरां गत्वा प्रज्ञाचक्षुषः स्वामिनः विरजानन्दात् बहुविधानि शास्त्राणि अशिक्षत। विद्यासमाप्तौ गुरुस्तमादिशत्-वत्स! देशोऽयमस्माकमविद्यान्धकारे पतितो वर्तते तद् गच्छ अविद्यान्धकारम् अपनय। आर्षशास्त्राणि उद्धर वैदिकज्योतिः च पुनः प्रकाशय।

प्रश्न-(i) मूलशङ्करः कुत्र विचरन् व्याकरणवेदान्तादीनि शास्त्राणि अशिक्षत?

(ii) अयं कस्य सकाशात् संन्यासगृह्णात् ?

(iii) तदा एषः किम् नाम्ना प्रसिद्धः जातः ?

(iv) प्रज्ञाचक्षुःस्वामी कः आसीत् ?

(v) अनन्तरं कुत्र गत्वा सः बहुविधानि शास्त्राणि अशिक्षत ?

(स) काकस्य रटनं श्रुत्वा वृक्षस्य समीपे चरन्तः वृक्षाग्रे डयमानाः वृक्षस्य कोटरेषु निवसन्तः च सर्वे प्राणिनः पशवः पक्षिणः साश्च समायाताः। तेषां मध्ये प्रथमं सर्पः फटाटोपं कुर्वन् न्यगदत् "पितृपितामहानां कालादपि अहम् अत्रैव निवसामि अतोऽयं वृक्षः मदीय एव" इति। ततः शाखातः शाखान्तरं चंक्रम्य एकः कीटः प्रत्यवदत्-"मदीयैः अर्भकैः सार्द्धम् अहं बहुवर्षेभ्यः अत्रैव उषितवानस्मि। अतोऽयं वृक्षः ममैव" इति ।

प्रश्न-(i) काकस्य किं श्रुत्वा सर्वे प्राणिनः समायाताः ?

(ii) सर्पः किम् कुर्वन् न्यगदत् ?

(iii) शाखातः शाखान्तरं चंक्रम्य कः प्रत्यवदत् ?

(iv) "अतोऽयं वृक्षः ममैव" इति कः अवदत् ?

(v) 'श्रुत्वा' इत्यस्य पदस्य प्रकृतिं प्रत्यञ्च पृथक्कुरुत।

प्रश्न १०. अधोलिखितेषु पद्यांशेषु पद्यांशद्वयस्य प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-

५×२=१०

(अ) तमध्वरे विश्वजिति क्षितीशं निःशेषविश्राणितकोष जातम् ।

उपात्तविद्यो गुरुदक्षिणार्थी कौत्सः प्रपेदे वरतन्तुशिष्यः॥

प्रश्न-(i) कस्मिन् अध्वरे क्षितीशः निःशेषविश्राणितकोषः जातः ?

(ii) विश्वजिति अध्वरे क्षितीशः कथं जातः ?

(iii) क्षितीशं गुरुदक्षिणार्थी क; प्रपेदे ?

(iv) कौत्सः कः ?

(v) 'अध्वरे' इत्यस्य पदस्य विभक्तिं वचनञ्च लिखत।

(ब) सत्येन धार्यते पृथ्वी सत्येन तपते रविः।

सत्येन वाति वायुश्च सर्व सत्ये प्रतिष्ठितम् ॥

प्रश्न- (i) रविः केन तपते ?

(ii) पृथ्वी केन धार्यते ?

(iii) वायुः केन वाति ?

(iv) सर्व कुत्र प्रतिष्ठितम् ?

(v) 'धार्यते' इति पदे का धातुः अस्ति?

(स) घनोपगूढ गगनं न तारा, न भास्करो दर्शनमभ्युपैति।

नवैर्जलौघैर्धरणी वितृप्ता, तमोविलिप्ता न दिशः प्रकाशाः॥

प्रश्न-(i) घनोपगूढ किम् ?

(ii) ताराः भास्करः च किं न अभ्युपैति ?

(iii) धरणी कैः वितृप्ता ?

(iv) तमोलिप्ताः काःन प्रकाशाः?

(v) 'प्रकाशः' इति शब्दस्य विलोमपदं लिखत।

प्रश्न ११. युग्ममेलनं कुरुत- १×४=४

| (अ) | (ब) |
|---|---|
| (क) मित्रम् | (i) गुरूः |
| (ख) वरतन्तुः | (ii)समयः |

(ग) राजधानी (ii) प्रीतिरसायनम्

(घ) अधिकः मूल्यवान् (iv) पन्नानगरम्

(v) वृक्षः

उत्तर-(क) (iii),(ख) (i), (ग) (iv), (घ) (ii)।

प्रश्न १२.शुद्धवाक्यानां समक्ष आम्' अशुद्धवाक्यानां समक्षं 'न' इति लिखत- १×४=४

(क) वृक्षाणां छेदनं महत् पापम् । http://www.mpboardonline.com

(ख) शुकस्य ध्वनिः अन्तरिक्षम् अस्पृशत् ।

(ग) शुद्धोदनः शाक्यवंशीयः न आसीत्।

(घ) छत्रसालः'बुन्देलकेसरी' इति नाम्ना प्रसिद्धः।

उत्तर-(क) आम्, (ख) न, (ग) न, (घ) आम्।

प्रश्न १३. अधोलिखितेषु प्रश्नेषु चतुर्णा प्रश्नानाम् उत्तराणि एकपदेन लिखत- १×४=४

(क) महाभारतस्य प्रणयनं केन कृतम्?

(ख) सर्वोत्तमं भूषणम् किम् अस्ति?

(ग) भूषणः कस्याः भाषायाः महाकविः आसीत?

(घ) वर्षाकाले शिखिनः किं कुर्वन्ति?

(ङ) मनः जाग्रतः कुत्र उदैति? ।

उत्तर-(क) वेदव्यासेन,

(ख) वाग्भूषणम्,

(ग) हिन्दीभाषायाः,

(घ) नृत्यन्ति,

(ङ) दूरम्।

प्रश्न १४. प्रश्नपत्रे समागतान् श्लोकान् विहाय स्वपाठ्यपुस्तकस्य सुभाषितद्वयं लिखत्। ४

प्रश्न १५. स्वप्राचार्यस्य कृते अवकाशार्थम् एकं प्रार्थनापत्रं संस्कृते लिखत।

अथवा

स्वभ्रातुः जन्मोत्सवस्य कृते मित्राय आमंत्रणपत्रं संस्कृते लिखत।

प्रश्न १६. अधोलिखितेषु पञ्च अशुद्धकारकवाक्यानां शुद्धिः करणीया-

(क) सः मोदकं खादसि।

(ख) एक: बालक: भवनेन पतति।

(ग) बालक : विद्यालयस्य प्रति गच्छति।

(घ) श्री गुरं नमः।

(ङ) गणेश: मोदकं रोचते।

(च) रामः सर्प विभेति।

प्रश्न १७. अधोलिखितवाक्यानां कथानुसारेण क्रम-संयोजनं कुरुत- १×५=५

(१) ततः वासुदेवः रामनाथपुरं प्राप्य रामदेवस्य गृहम् अगच्छत्।

(२) गङ्गातीरे मार्कण्डेय: नाम कश्चन मुनिः वसति स्म।

(३) शिष्यः अनन्तरं रामनाथपुरं प्रति प्रस्थितवान् ।

(४) वासुदेवः तस्य प्रियः शिष्यः आसीत्।

(५) किञ्चिदग्रे गतः वासुदेवः कञ्चित् देवालयम् अपश्यत्।

उत्तर-(२)→(४)→(५)→(३)→(१)।

प्रश्न १८. अधोलिखितम् अपठित गद्यांशं सम्यक् पठित्वा प्रश्नानाम् उत्तराणि संस्कृतभाषायां लिखत-http://www.mpboardonline.com 5

जननी जन्मभूमिश्च स्वर्गादपि गरीयसी। जन्मभूमिः स्वर्गात् उत्कृष्टतरा अस्ति। सा लोकानां शरणदायिनी, विविधखाद्यपदार्थ प्रदायिनी, सर्वव्यवहाराणां लीलाभूमिः च अस्ति। वैदिकः ऋषिः कथयति-माता भूमिः पुत्रोऽहं पृथिव्याः। वयं राष्ट्रभावां, राष्ट्रियचरित्रं, त्यागभावनां विना राष्ट्रस्य संरक्षणं कर्तुं न पारयामः। परस्परैक्यभावनां विना राष्ट्र कदापि समृद्धः न भवति। अतः अस्माभिः स्वार्थं परित्यज्य देशस्य देशवासिनां च सेवा सततं करणीया।

उपर्युक्तगद्यांशं पठित्वा अधोलिखितप्रश्नानाम् उत्तराणि लिखत-

(१) जन्मभूमिः कस्मात् गरीयसी ?

(२) 'माताभूमिः' इति कः कथयति ?

(३) अस्य गद्यांशस्य सारं लिखत?

(४) 'स्वर्गात्' शब्दे का विभक्तिः अस्ति ?

प्रश्न १९. अधोलिखितेषु एकं विषयं स्वीकृत्य शताशब्देषु संस्कृतभाषायां निबन्धं लिखत- १०

(क) अस्माकं देशः, (ख) छात्रजीवनम्, (ग) मम प्रियः कवि, (घ) सदाचारः।